# कारुण्यं परमो धर्मः

वर्षकालस्य एकं सायाह्नम् । आकाशं सर्वतः कालवर्ष मेघाः भीकराकारं धारयन्तः सञ्चरन्ति । सागरतरङ्गाः अट्टहासं कुर्वन्तः तीरे शक्त्या घट्टयन्ते । सागरपक्षिणः भीता आक्रान्दनं कुर्वन्तः डयन्ते । झटिति आकाशः दुन्दुभिनादेन वर्षसूचनां ददाति । प्रकृतेः इदं भीकरदृश्यं पश्यन्तः जनाः स्वगृहेषु शरणं प्राप्नुवन्ति ।

सतीशः सागरतीरे एकाकि उपविशन् आसीत् । प्रकृतेः विकारः तस्य मनसि परिभ्रमं न अजनयत् । विविध विकारविचारः तस्य मनसि तरङ्गरूपेण आन्दोलयन्तः आसन् । दुःखनिमग्नं तस्य मनः । किम् एतादृशी अवस्थायाः कारणं ? अस्ति एका कदनकथा ....

सतीशस्य परिवारः निर्धनः अभवत् । पिता, माता, सहोदरी सतीशश्चेति चत्वरः जनाः तत्र आसन् । पिता कस्मिंश्चित् यन्त्रागारे कर्मकरः आसीत् । अतीवस्नेहेन सः कुटुम्बं पालयति स्म। पुत्रः सतीशः पुत्री सुकन्या च पठने समर्थौ आस्ताम् । स्पर्धबुद्ध्या द्वावपि पठितः स्म । सतीशः न केवलं पठने

अपि तु कलाकायिकक्षेत्रेषु अपि निपुणः आस्ताम् । अतीव प्रयत्नशीलः आसीत् सः । एवं विद्यालयस्य देशस्य च प्रशंसा पात्रमभवत् सतीशः ।

अहो कष्टम् ! तस्य सकलसुखसौभाग्यानि अकस्मादेव समाप्तानि । एकदा यन्त्रशालात् प्रत्यागमनसमये कस्मिन्नपि अज्ञात वाहनापघाते पिता दिवंगतः । तत् दिनं विद्यालयस्य देशस्य च दुःखदिनं अभवत् । तान् समाश्वासयितुं बहवः आगताः । किन्तु सर्वेषां प्रयत्नः निष्फलः अभवत् ।

माता सन्तानयोः भविष्यं विचिन्त्य दुःखाकुला अभवत् । छात्राणां पठनं कुटुम्बस्य व्ययः च कथं करणीयम् इति सा चिन्तयितुं आरब्धवती । गृहे केचन केरवृक्षाः आसन् । तद्वारा किञ्चित् धनं लभते । किन्तु नारिकेलस्य मूल्यच्युति अभवत् । ~~इत्यनेन~~ इत्यनः ततः लाभः अधिकः न लभते । अतः सा अन्यगृहेषु कर्म कर्तुम् अगच्छत् ।

सतीशस्य अधुना वयः द्वाविंशति अभवत् । कलालय पठनं समाप्य सः समीपस्थान् छात्रान् गणितं अङ्गलं च पाठयितुं आरभत । एवं मातुः साहायं सः करोति स्म । कदाचित् सतीशस्य मित्रं रवीन्द्रः साहाय्यं अकरोत् । सः अधुना धनिकः अभवत् । पठनकार्येषु यावच्छक्यं सः साहायं

अकरोत् ।

एवं सतीशस्य जीवितं अग्रे अगच्छत् । किन्तु निरन्तरेण अमितप्रयत्नेन तस्य माता शय्यावलम्बिनी जाता । तस्मिन् समये अपि रवीन्द्रः तस्य साहाय्यं कर्तुम् अगच्छत् । तन्मध्ये सः अङ्गलसाहित्ये बिरुदानन्दरबिरुदं सम्पादितवान् । तस्य सोदर्याः इदानीं विवाहप्राय समागच्छत् । यद्यपि सा सुन्दरी सुशीला च वर्तते तथापि धनस्य अभावेन विवाहः समये न अभवत् । मनोदुःखाय अधिकं किम् आवश्यकम् ?

एतस्मिन् जीवितक्लेशे अपि सः अध्यापकपरीक्षायां विजयं अविन्दत । किन्तु अधुना तेन किम् प्रयोजनम् ? सर्वकारेण अध्यापकनियुक्ति निरुद्धा आसीत् । सर्वगुणसम्पन्नाः निर्धनः क्लेशं अनुभवति । निर्गुणाः सम्पन्नाः सुखेन जीवति च । दुःखितः सतीशः अचिन्तयत् -

“ अहं भाग्यहीनः अस्मि । अहं जीविते निरन्तरं प्रयत्नं अकरोत् । किन्तु मम लक्ष्यं साक्षात्कर्तुम् अहं शक्तो नास्मि किम् करणीयम् ? ”

समयं अतिक्रम्य सूर्यः चरमगिरिं प्राप्तवान् । घोरान्धकारः भूमौ प्रसरति स्म । झटिति सतीशस्य स्कन्धे कोऽपि स्पृष्टवान् । तस्य मित्रं रवीन्द्रः एवासीत् सः । सः अधुना विदेशे

कर्म करोति । विरामं स्वीकृत्य गृहं आगतवन्तः आसन् । मित्रस्य दुःखस्थितिं ज्ञात्वा अधुना आगतः वर्तते । सतीशस्य साहाय्यं कर्तुम् सः ऐच्छत् । रवीन्द्रस्य पिता विद्यालये अध्यापकपदवीं रिक्ता आसीत् । तत्र सतीशं प्रेक्षयितुं सः इष्टवान् । रवीन्द्रः धनिकः भवति किन्तु तस्य मनसि तस्य ~~मित्रेषु~~ मित्रेषु प्रति करुणा तथा स्नेहः च भवति । "प्रिय मित्र सतीश लक्ष्मीदेवी भवन्तं परिपालयिष्यति" इति सः अवदत् । सतीशस्य नेत्रयोः सन्तोषाश्रूणि आगतानि ।

रवीन्द्रः तेन साकं तस्य गृहमगच्छत् । मातुः समीपं गत्वा समाश्वासयत् च । अनन्तरं सः अवदत् "प्रिय मित्र सतीश ! अहं जानामि यत् मम मित्रस्य सहोदरी मामपि सहोदरी इति । किन्तु तव दुःखस्थितिं ज्ञात्वा अहं एव निवेदयामि यत् तव सोदर्याः विवाहं कर्तुम् इच्छामि इति।" आनन्दाधिक्येन सः रवीन्द्रं आलिङ्गितवान् ।

एव सुकन्या रवीन्दस्य पत्नी अभवत् । सर्वेषां जनाः तस्य कारुण्यं प्राशंसयत् किन्तु सः अवदत् "मम कर्मः प्रशंसा पर्याप्तं न भवति तत् मम धर्मः एव । सहजीविनां प्रति कारुण्यं मम जीवितधर्मः । एव । तत् पालयितुं अहं नियुक्तः अभवत् अतः प्रशंसायाः आवश्यं न भवति ।"

तत् श्रुत्वा सतीशः कृतार्थः अभवत् । सः अचिन्तयत् मम सोदरी उचितस्य हस्ते एव अस्ति । सः रवीन्द्रः एकं उत्तमः पुरुषः भवति । अतः अहं अतीवसन्तुष्टः इति । सः रवीन्द्रः धनीकः भवति अपि तु सः अतीव कारुण्यशीलः च भवति।

सः सतीशस्य जीविते कारुण्येन प्रकाशं प्रसारितवान्। सतीशस्य जीविते पुनरपि वसन्तः समागतः । रवीन्द्रस्य साहाय्येन मन्दं मन्दं सः जीवितक्लेशेषु मुक्तिं प्राप्तवान् । मनुष्यत्व राहित्येन अन्धकारे प्रसरितवन्तः इदं लोके कारुण्यस्य प्रकाश किरणः एव रवीन्द्रः । तस्य कारुण्येन सः अतीव उन्नतः अपि तु सर्वेषु प्रियमानः च वर्तन्ते । तस्य करुणापूर्ण मनोभावेन विदेशे अपि सः प्रसिद्धः अभवत् । सर्वं तस्य कारुण्यपूर्वकं उत्तम प्रवर्तनानां फलं । अधुना अपि सः सहजीवीनां प्रति कारुण्यं पालयित्वा जीवति । अतः एवं उच्यते "कारुण्यं परमो धर्मः" इति ।

— शुभम् —

(Note: Graded articles may be published in schoolwiki. So, Write neatly. Don't fold paper. Don't write overleaf).